**अनपत्रप** त्रि॰ नास्ति अपत्रपा अन्यहेतुका लज्जा यस्य। अन्यहेतुकलज्जाहीने।

**अनपभ्रंश** पु॰ न अपभ्रंशः न॰त॰। अपभ्रंशभिन्ने व्याकरणप्रतिपाद्यसंस्कारवति साधुशब्दे "अनपभ्रंशता-नादिर्येद्वाभ्युदयोन्यता। व्याक्रियाव्यञ्जनीया वा जातिः कापीह साधुतेति" हरिः।

**अनपाकर्म्मन्** न॰ अपाकर्म अपाकरणम् अभावार्थे न॰त॰। अपाकरणाभावे ऋणादेरशोधने।

**अनपायिन्** त्रि॰ न अपैति अप–इण–णिनि न॰त॰। निश्चले स्थिरे "अनपायिनि संश्रयद्रुमे गजभग्ने इति" कुमा॰।

**अनपावृत्** त्रि॰ अपावर्त्तनमपावृत् अप+आ+वृत–भावे क्विप् न॰ब॰। पुनरावृत्तिशून्ये। "इत्था सृजानाह अनपावृद-र्थमिति ऋ॰ ६,२,५, "अनपावृत् अपावृत् अपावर्त्तनम् पुनरागमनं न भवतीति" भा॰।

**अनपिहित** त्रि॰ न अपिहितमावरणं भावे क्त तन्नास्ति यस्य। आवरणशून्ये। "एष वानपिहितस्तस्यैव तदपिधानं यच्छिखेति श्रा॰ "अनपिहित आवरणशून्य" इति रघु॰।

**अनपेक्ष** त्रि॰ न अपेक्षते अनुरुध्यते अच् न॰त॰। अपेक्षा-शून्ये अननुरोधिनि। "उत्सृज्य प्रमदामेतामनपेक्षो यथासुखमिति" रामा॰।

**अनपेत** त्रि॰ न अपेतः वहिर्गतः अपगतो वा। अवहिर्गते अपेतभिन्ने अनुगते। "धर्म्मपथ्यर्थन्यायादनपेते" इति पा॰ "धर्म्मादनपेतम् धर्म्यमित्यादि" सि॰कौ॰।

**अनप्न** त्रि॰ न आप्नः वेदे पृ॰ ह्रस्वः। आप्नभिन्ने। "अनप्न-मप्सु दुष्टरमिति" ऋ॰ ८, १६,३, "अनप्नं शत्रुभिरनाप्न-मिति" भा॰।

**अनप्नस्** त्रि॰ नास्ति अप्नो रूपं यस्य। रूपहीने "जम्भाया अनप्नस इति" ऋ॰ २,३,६, 'अनप्नसः कर्म्महीना" इति भाष्योक्तेः कर्म्महीने च।

**अनफा** पु॰ (चन्द्रात्)"रविवर्ज्जं द्वादशगैरनफेति" दीपिकोक्तेः योगभेदे "सच्छीलं सुखान्वितं प्रभुं ख्यातियुक्तमन-फायामिति" दीपिका।

**अनभिज्ञ** त्रि॰ न अभिजानाति। अज्ञे ज्ञानशून्ये।

**अनभिधेय** न॰ न अभिधेयः। अवाच्ये।

**अनभिभव** पु॰ न अभिभवः अभावार्थे न॰त॰। अभिभवा-भावे पराजयाभावे।

**अनभिभवनीय** त्रि॰ न अभिभवनीयः। अपराजेये।

**अनभिभूत** त्रि॰ न अभिभूतः। अपराभूते।

**अनभिमत** त्रि॰ न अभिमतः। असम्मते, विमते च।

**अनभिम्लातवर्ण्ण** त्रि॰ अभि+म्ला–तन् न अभिम्लातः क्षीणोवर्णो यस्य। दीप्यमाने। "सो अपां नपादनभि-म्लातवर्ण्ण" इति ऋ॰२,३५,१३ अनभिम्लातवर्णः दीप्यमान इति भा॰। शिवा॰ अण्। आनभिम्लातः तदपत्ये पु॰स्त्री।

**अनभिलाष** पु॰ न अभिलाषः अभावे न॰त॰। अभिलाषा-भावे। न॰ब॰। अभिलाषशून्ये त्रि॰।

**अनभिव्यक्त** त्रि॰ न अभिव्यक्तः न॰त॰। अपरिस्फुटे।

**अनभिशस्त** त्रि॰ अभि+शनस–क्त न॰त॰। अनिन्दिते। "पराशानभिशस्ता दिव्या" इति ऋ॰ ६,८८,७, "अन-भिशस्ता अनिन्दिता" इति भा॰। परिवादग्रस्ते च।

**अनभिशस्त्य** त्रि॰ अभिशस्तिं निन्दामर्हति अभिशस्त्यः न॰त॰। अनिन्दनीये प्रशस्ये निरुक्तकारः।

**अनभिसंहित** त्रि॰ न अभिसंहितः न॰त॰। अभि-सन्धिना फलोद्देशेन अकृते "विसृक्तिदा येऽनभिसंहिते-ष्विति" रुचि॰।

**अनभिहित** त्रि॰ न अभिहितः। अनुक्ते प्रत्ययादिना उक्तार्थभिन्ने "अनभिहिते इति पा॰ अस्य उपकादिगणे पाठात् तत्कार्य्यम्। [वातस्कगगमनामिति" का॰द॰।

**अनभीष्ट** त्रि॰ न अभीष्टः। अभीष्टभिन्ने "अनभीष्टदक्षिण-

**अनभ्यावृत्ति** स्त्री न अभ्यावृत्तिः अभ्यासः अभावार्थे न॰ त॰। अभ्यासाभावे। "मनागनभ्यावृत्त्या वा कामं क्षाम्यतु यः क्षमीति" माघः।

**अनभ्यासमित्य** त्रि॰ न अभ्यासे निकटे इत्यः इण–कर्म्मणि क्यप् सुम्। दूरतः परिहर्त्तव्ये सि॰ कौ॰।

**अनमित्र** त्रि॰ नास्ति अमित्रोऽस्य। शत्रुशून्ये "इन्द्रोयां चक्रे आत्मने अनमित्रां शचीपतिरिति" अथ॰ १२,१, नृपभेदे पु॰।

**अनमीव** त्रि॰ अमीवः रोगः न॰ब॰। रोगहीने "अनमीवा इषस्करदिति" ऋ॰ ३,१६२,१४, अनमीवा "रोग-वर्जितानि इषोऽन्नानीति" भा॰ "प्रदानमीवस्य शुष्मिणः" इति ता॰ब्रा॰। "अरोगोऽमीवस्तद्रहितस्येति" भा॰।

**अनम्बर** पु॰ नास्ति अम्बरं कच्छसहितं यस्य। बौद्धभेदेऽस्य मुक्त-कच्छतया तथात्वम् दिगम्बरशब्देऽस्य विवरणम्। नग्ने त्रि॰।

**अनय** पु॰ अयः शुभावहो विधिस्तदन्यः न॰त॰। अशुभ-दैवे। नयोद्धृते दक्षिणावर्त्तेन शाराणामिष्टस्थान-नयनं विरोधे न॰त॰। (दुगडीति) ख्याते द्यूतभेदे शाराणा वामावर्त्तेनाभीष्टस्थाननयने पु॰। नयोनीतिः